# गुरु विमर्शसहस्रनाम स्तोत्रम्

**शब्द शिल्प–श्रमण विचिन्त्यसागर**

(प्रस्थावना पीठिका)

नमोः आचार्य रत्नाय सुरिणे वै सदा नमः।
नमः श्री आत्मदीपाय दिग्वासाय नमो नमः।।1।।

नमोऽपभूताय ब्रह्मनिष्ठाय तेनमः।
मोक्षमार्गप्रकाशाय जिताक्षाय नमोसतु तेः।।2।।

नमः श्री धर्मपालाय धर्मशीलाय तेनमः।
नमः श्री स्वात्मधर्म्माय श्रीधर्माय नमो नमः ।।3।।

नमः श्रीधर्मपुत्राय शुभ्ररूपाय तेनमः।
नमो मङ्गलरूपाय धर्मधात्रे नमो नमः।।4।।

नमः प्रशान्तरूपाय शान्तरूपाय तेनमः ।
नमो दुरितनाशाय अकामाय नमो नमः।।5।।

नमः परमभावाय श्रीसुधर्मात्मने नमः।
नमः सूरिवरेण्याय धर्मिष्ठाय नमो नमः ।।6।।

नमः धर्म प्रकाशाय सुप्रभावाय तेनमः।
नमः श्रीललिताङ्गाय श्री धराय नमो नमः।।7।।

नमः धर्मनिकेताय श्रीजिनागम पन्थिने।
लोकानुग्रहकाराय सु सुराज्ञे नमो नमः।।8।।

नमः श्रेयस्स्वरूपाय श्रेयस्पन्थ प्रकाशिने।
श्रीवचनाभिरामाय सुगम्याय नमो नमः।।9।।

नमः श्री स्वात्मगुप्ताय स्वात्मविद्या विधायिने।
श्रीवरेण्याग्रगण्याय धर्मिणे वै नमो नमः।।10।।

नमः गुरुविमर्शाय पंथ जिनागमाय च।
आत्मविद्या प्रकाशाय सिद्धि प्रदायिने नमः।।11।।

नमोः गुरुविरागाय स्वात्मतेजोभिस्ते नमः।
उपसर्गविजेताय नमः शुद्धोपयोगिने।।12।।

नमोः गुरुगरिष्ठाय शुद्धरूपाय वैनमः।
भावलिंङ्गिभदन्ताय नमस्ते राष्ट्रयोगिने।।13।।

(इति प्रस्तावना)

साम्योदयो व्रतांकांक्षी विद्योदयः सुसाधकः।
आत्मोदयो गुणाकारः पूर्णोदयो विराचिंतः।।1।।

सत्योदयो हिताकांक्षी पुण्योदयो विधायकः।
भाग्योदयो गुणाकांक्षी गुणोदयो गुणोत्तमः।।2।।

शिष्योदयः पूर्णाकांक्षी दिव्योदयो गुणप्रदः।
ज्ञानोदयो निजाकांक्षी तपोयस्यनायकः।।3।।

समोदोय शिवाकांक्षी व्रतोदयो विज्ञायकः।
रत्नोदयो विशेषज्ञो मङ्गलीयो हितोदयः।।4।।

इष्टोदयः सुगम्भीरो गुणशिल्पी शुभोदयः।
हर्षोदयः शुभाकांक्षी काव्योदयो हितंकरः।।5।।

श्रद्धोदयश्च सुश्रेष्ठ शुद्धसाधुर्जिनोदयः।
ब्रह्मोदयः सुखाकांक्षी नैकेषां मंगलोदयः।।6।।

सर्वोदयः सुधाकांक्षी स्वंतगतो निजोदयः।
शास्त्रोदयः सुविक्रान्तः आत्मजयी सुखोदयः।।7।।

सूत्रोदयः सुविद्यान्तः शीलेशः शरणोदयः।
ज्ञानोदय सुशान्तश्च प्रीतेशो विनयोदयः।।8।।

ग्रंथोदयः सुप्रक्रान्तो निर्मेयो नियमोदयः।
अंतोदयश्च विश्वार्थो रक्षकः श्रमणोदयः।।9।।

पंथोदयः सु विश्वार्को, नम्रधीश्चरणोदयः।
योगोदयः सुविश्वांशः, संबलः परमोदयः ।।10।।

धर्मोदयः सुविश्वांको, विहितश्चदयः।
मंत्रोदयः सुविप्रान्तोः विजेयश्चरमोदयः ।।11।।

यंत्रोदयः सुविश्वार्यः विव्रतः शरणोत्तमः।
तंत्रोदयः सुविश्वाक्षः विगम्यश्चवरोदयः।।12।।

लोकोदयः सुविश्वज्ञो विशुभ्रश्चागमोदयः।
मम गुरुःविमर्शो वै सर्वसंगविवर्जितः।।13।।

ॐ ह्रीं श्रीसाम्योदयादि शत नाम धारकाय श्रीविमर्श गुरवे नमो नमः।

(इति प्रथमं श्री साम्योदयादि शतकम्)

(अथा अक्षोभ्यादि शतकाम्)

अक्षोभ्यश्चानुत्सेको ह्यानामययात्मदर्शकः।
निजदृष्टि रनुक्रोशः कर्मिष्ठः शुभचिंतकाः ।।1।।

विश्वंकर उदासीनोऽमलिनानात्मवञ्चक:।
अर्चको दिव्यचारित्रादनुत्तमोऽनुभावक:।।2।।

गुणदृष्टि: सुकीर्तिश्च सुखदृष्टिरलोलुप:।
अभिरामस्वोपोऽधिक्यो गुणगुरुश्चाधीश्वर:।।3।।

भावलिङ्गी सुधी-साधुर्ज्ञानधीरात्मनिंदक:।
टीका अप्पोदयाकर्त्ता विरुजोऽरुष रक्षक:।।4।।

समयज्ञ: सुधाभोगी चाधिगुणात्मसर्जक:।
गुणधरो गुणधीशो जिनचर्याधुरन्धर:।।5।।

आत्मज्ञ: परमाधारी स्वात्मसिद्धोऽपराजित:।
धर्मधुराधरोऽनिद्र: पुण्यभागी त्वनुस्मृत:।।6।।

निर्विकल्पो नरोत्तम: सुविचारो महायश:।
शिष्योत्तम: सुपाठी च गुरुत्तम: सुपाठक:।।7।।

अप्रमेयोमनोहारी अप्रमत्तोऽनुनायक:।
अतिभू प्रतिभाशाली शोभनीय: शिवप्रद:।।8।।

धीर: श्चैवाप्रतिद्वन्द्वो, गूढतत्त्वविवेचक:।
सम्यक्त्ववर्धकोभव्यो गुणगण:: सुवर्धक:।।9।।

अतिग्रहोऽभिरक्षार्थी हितैषी स्वात्मचिंतक:।
प्रियदर्श: सुनिर्मुक्तश्चारुदर्श: सुतन्मय:।।10।।

वर्धमान: स्वरूपज्ञो भक्तोत्तमो यमोदय:।
अनुत्तमो योगाकांक्षी भव्योत्तमोऽनुशासक:।।11।।

अनलसो विद्याकांक्षी, अलोलो हितचिंतक:।
अनुध्यानी तप:कांक्षी हितनिष्ठोऽनुकंपक:।।12।।

उपसर्ग विजेतात्वं, नम: संसारभीरुर्वीरधी।
वर सिद्धकुलांशश्च, विमर्शगुरुरत्तम:।।13।।

ॐ ह्रीं श्रीअक्षोभ्यादिशतनाम धारकाय श्रीविमर्शगुरवे नमो नम:।

(इति द्वितीयं श्री अक्षोभ्यादि शतकम्)

(अथ शुद्धयाशादि शतकम्)

शुद्धयश: श्रुताभ्यासी निर्विकल्प: श्रुतान्वित:।
दिव्यमूर्तिश्चमाहात्म्य: पुण्योद्यमी सुधाकर: ।।1।।

भोजी ज्ञानामृतस्त्यागी निर्विकारो निरामय:।
शुभांश सच्चिदानंद: करुणानिधिरक्षर:।।2।।

अतिगुणो युगाचार्यो नित्यधर्मी सुविक्रमी।
शिवयात्री स्वलीनो वै स्वात्मधर्मी सुधार्मिक:।।3।।

परमाभवश्चश्रीभद्र: उत्तमेशवरोह्युत्तम:।
आर्षमार्गी च आर्षेस: आगमचक्षुरागम:।।4।।

संजीवनी सुसंजीवो जितात्मा सुजितेन्द्रिय:।
अर्वाचीन: सुप्राचीन: सहिष्णुर्गुणधारक:।।5।।

शीलांशो रचनाधर्मी गुरुरुत्कृष्टसाधना।
आकर्षकश्चसिद्धार्थो, निजप्रार्थी विभोदय:।।6।।

उत्तमशासकश्चिन्त्यो, विनयांतश्चसुव्रत:।
हृदयाकर्षकोऽचंडो जगतिगौरवोऽजित:।।7।।

आचार्य कुञ्जंरोऽक्रोध: श्रमणगौरवोऽचर:।
विमलांत: सुविक्लांतश्चातिचमूरगोचर:।।8।।

विजयांत: श्चैवात्याक्षो विजितांत:, सुविध्रुव।
मोक्षमार्गी युवाचार्यो यज्ञबोधात्मलोचन:।।9।।

अनभिज्ञोऽनसूयाक्षो नित्यांशश्चात्मलोचक:।
करपात्री प्रभाधिक्यो नि:कांक्षितो व्रतालय:।।10।।

अनवधिरनाकांक्षी, विदितमहिमोजिन:।
गतमोह सुनिस्वार्थो शान्तचित्त: शिवालय:।।11।।

सुप्राकृत: क्षमाप्रेमी निर्विलासो निरूपक:।
विद्यानुभवविदीक्षात: आत्माक्षी शुद्धचिंतक:।।12।।

ज्ञानचक्षुरनुश्रांतो गुणभद्र: शुभंकर:।
मोक्षमार्गप्रज्ञानो, विमर्शोगुरुरुत्तम नम:।।13।।

ॐ ह्रीं श्रीशुद्धयाशादि शतनामधारकाय श्री विमर्शगुरवे नमो नम:।

(अथ गुणभद्रादि शतकम्)

गुणभद्रो व्रताचार्यो, योगि मुख्यो वरोत्तम:।
आध्यात्मिको महाचार्यो, धर्मकेतुरचालक:।।1।।

अनुगतिस्तपश्चारो, लीलाधरो नरोत्तम:।
विश्वतीर्थो च विज्ञाता गुणधरो महागुरु:।।2।।

विजितांत: शुभाचार्यो ज्ञानधरो दिवाकर:।
वाञ्छांकुश: कृपाचार्यो: सूत्रधरो महायश:।।3।।

धर्मेश्वरो गुणाचार्यो यशोधरो शिवाकर:।
गुणवृद्धो यथाख्यातो चर्याधर: सुविक्रम:।।4।।

भवभीरूर्महादानी धर्मराज: सहायक:।
शुद्धयोगी महाज्ञानी अनुपमो महागुणी।।5।।

श्रेयस्कर: सुज्ञानाभो दीर्घदर्शी सुमंगल:।
अकलंको महाशक्ति: प्रतिष्ठाप्रसवोऽमल:।।6।।

हेमाभप्रीतिवर्धांशो गुणनिष्ठ: सर्वोत्तम:।
गुणमण्डल इन्द्रार्चो: सौम्याकृतिर्गवेषक:।।7।।

तपोवृद्ध: सुनिर्मोही धर्मतीर्थ: सुनिर्वृत:।
काव्यचक्री प्रशान्तात्मा, सुव्रत: संघचालक:।।8।।

क्षमाधर: सुनिर्लोभी अभिवंद्योऽभिनंदनो।
निरूपम: सुनिर्दोषी निर्मलो गुणसागर:।।9।।

क्रोधजेता वरात्माभो: ग्रंथोदधिर्सुब्राह्मण:।
मानजेता क्षमाप्रेमी विदेहान्त: सुनिर्भय:।।10।।

क्षमाकर: सुसत्यार्थी आत्मव्यापी वरालय:।
मायाजेता वरात्मार्थी विश्वव्यापी सुखालय:।।11।।

चैत्यालयो विनेयांत: स्वात्मवासी चलोभजित्।
नि:शंकितो विजेयांतो युगश्रेष्ठ:-जपी-व्रती।।12।।

श्रेयोनिधिश्माधर: सुमुमुक्षुर्चिरंतन:।
सारस्वताभिनन्द्यार्य: विमर्श: गुरुरुत्तम:।।13।।

ॐ ह्रीं श्रीगुणभद्रादिशतनामधारकाय श्रीविमर्शगुरवे नम:।

(अथ शिष्यामालादि शतकम्)

(इति चतुर्थं श्री गुणभद्रादि शतकम्)

शिष्यपालो गुणाधार: शिष्यस्वामी सुलक्षण:।
शिष्यपतिर्गुणाकार: शिष्यधरोऽमरोऽर्चित:।।1।।

शिष्यनाथ: सुधाधर्म: ज्ञानधरो गुणेश्वर:।
सौम्यमूर्तिर्मनोज्ञात्मा ज्ञानचंदो गुणालय:।।2।।

क्षमामूर्तिर्यथाजात:, क्षमामतिर्विविधायक:।
धर्मपालो जितानंगो जयपाल: सुनायक:।।3।।

धर्माचार्य तपोनिष्ठो गुणपाल: शिवालय: ।
आशुकविर्गुणान्वेषी सुखीसाधु: पूर्णोदय: ।।4।।

विचक्षणो महासाधु: र्भावसाधु वृषध्वज:।
क्षेमंकर: सुमेधावी चर्यानिष्ठ: शुभोदय:।।5।।

सुशिक्षक: सुज्ञानाब्धिर्निस्सीमो गुणवर्धन:।
लक्ष्यनिष्ठो विशालाक्ष: शुभप्रद: प्रभामय:।।6।।

अक्षरोयशवर्धस्व: पुण्यतीर्थ: सुखालय:।
सिद्धयोगी मनोविध: विश्वयोगी सर्वोत्तम:।।7।।

ललितांगो महायोगी राष्ट्रयोगी जितान्तक:।
परमेष्ठी निजान्वेषी स्वात्मविद्य स्वलौकिक:।।8।।

विलक्षणो महर्षि वैयर्महात्रऋषिर्महोदय:।
समवृत्तिर्तप: कीर्तिरनिकेत: सुरार्चित:।।9।।

वरप्रद: सुसिद्धांशो, यशकीर्तिनिरम्बर:।
अजातशत्रु: पुण्यात्मा निश्चेल: सुखदायक:।।10।।

ज्ञानधनादिसंविष्टो, गुणदेहोऽविरोधक:।
दयामूर्तिर्महादेवो दिगम्बरो दयाध्वज: ।।11।।

समयज्ञोमितज्योतिर्गहत्यागी व्रतोदय:।
पुण्यनिरूपकोऽश्च ज्ञानवृद्धि: रूपाश्रय: ।।12।।

शमी दमी निरालम्बो विख्यात: सुचरित्रक:।
भावलिंगी यतिर्साधु: विमर्शोगुरुरुत्तम: नम: ।।13।।

ॐ ह्रीं श्रीशिष्यपालादिशतनामधारकायश्रीविमर्शगुरवे नमो नम:।

(इति पंचमं श्री शिष्यपालादि शतकम्)

(अथ शिवपंथ्यादि शतकम्)

शिवपंथी शुभाचारी सुपाठी भवतारण:।
विश्वर्षिस्तु सदाचारी भव्यश्च भवच्छेदक:।।1।।

प्रियधर्मोविचारज्ञ विशालाक्षो दयागुण:।
गुणदृष्टिर्दयासिन्धू रमणीयो दयानिधि:।।2।।

शिष्टाचारो विजीगीषु रुत्तमांगो महोन्नत:।
विश्वगुरुरभीष्टात्मा समप्रज्ञ: सुसाम्यज:।।3।।

अनक्षो जगज्योतिर्विजयेश: सुब्रह्मविद्।
अधिदेव: सुतत्वज्ञ, उत्तमार्थोजयोत्सव:।।4।।

अभेद्यो जगतीज्येष्ठो, जिताक्षो गुणनायक:।
जिनभक्तो विदेहान्तो वाचस्पतिर्गतस्पृह:।।5।।

सतार्चित: सुगौरांगो, योगी परमभावन:।
अविकार: सुरत्नेशो भुवनकीर्तिरच्युत:।।6।।

अनुगामी चानेकांती गुणरत्नाकरोऽकंप:।
सुकान्त: प्रशमानंद: चारुकीर्तिगुणालय:।।7।।

पुण्याधार: व्रताभ्यासी स्वात्मशिल्पी महागुणी।
सुकविर्दृढ़श्रद्धानी, युगशिल्पी महामना।।8।।

सुभव्यो विनयाचारी भव्य: सुखप्रचारक:।
नि:संग: प्रतिभापुञ्ज: सपूत: समताधर:।।9।।

निर्वादी श्रमणाचार्यो निष्कंपो राष्ट्रगौरव:।
सुलोचन: कलादृष्टा स्याद्वादिषु समर्चित:।।10।।

अंगलक्ष्मी शिवानंद:, प्रबुद्ध: ग्रन्थसर्जक:।
अयोनिष्कोऽल्पसंसारी संघ संचालको वर:।।11।।

बहुभाषाविद् सूर्याभो, नि:शल्यो निजवेदक:।
शुभकीर्तिर्महावाहु, रगम्य: सुखवेदक:।।12।।

एवं विघ्नविनाशको, दिव्यरूप: प्रभायुत:।
सकल दु:खहर्ता त्वं विमर्श:गुरुरुत्तम:।।13।।

ॐ ह्रींश्रीशिवपंथ्यादिशतनामधारकायश्रीविमर्शगुरवे नमो नम:।

(इति षष्ठं श्री शिवपन्थ्यादि शतकम्)

विभद्र: सर्वतोभद्रो मूलाचारी प्रयंजन:।
विपंक: करुणामूर्तिस्तेजस्वी तप: साधक:।।

सिद्धार्थो महिमाशाली निष्पापी धर्मसाधक:।
श्रुतार्थ: सिद्धिसम्पन्नो निश्चितोऽर्थोत्भयंकर:।।
सर्वार्थ: मुनिराराध्य: ज्ञानसूर्य: स्वयंवर:।
शुद्धांशी चापराजेय: रम्योधर्मधुरंधर:।।

मर्मज्ञो नीतिनिपुणो वैरागी श्रमणोदय:।
ज्ञानान्वेषी शिवानंदो विदक्षो धर्मनायक:।।

आचार्यो जगतीश्रेष्ठ: श्रद्धेयो विश्वगौरव:।
चारित्रशीलसंयुक्तो विमर्शोगुरुरुत्तम:।।

ॐ ह्रीं श्री विश्वानंदमयादि शत नमन धारकाय श्री विमर्शगुरवे नमो नम:।

(इति सप्तमम् श्री विश्वानंदमयादि शतकम्)

परमगुण: श्री सौम्य: शुभ: सममनोविभु:।
परम दृढ़ संकल्पी स्वात्म विद्याविशारद:।।
परमधीरमर्मज्ञ: परमलक्ष्य: संयमी।
परमाभीक्ष्णसज्ज्ञानी परमाचार्यो वीतभी:।।

परमहितविद्याक्ष: परमब्रह्म शास्त्रविद्।
परमवीरो धर्मज्ञ: हंस इव मुनिर्महान्।।

परमभाव निस्पृही परम: पुरुषार्थ।
परमाक्षजयी साधु: परमोविश्वतोमुख:।।

परममुनि: श्रीधर्मोगुणाभोवरसन्मति:।
ज्ञानवैराग्ययो:ज्योति विमर्शो गुरुरुत्तम:।।

ॐ ह्रीं श्री परमाकंप संदीपादि शतनाम धारकाय श्री विमर्शगुरुवे नमो नम:।

(इति अष्टमं श्री परमाकंप संदीपपादि शतकम्)

आत्मगुप्तो निजास्तिक्य: स्वात्मभद्रो निजोन्नत:।
आत्मागारो निजाचार्य: स्वात्मयोगी विशोधक:।।

निजरम्या जिनात्मांशी स्वात्मभोगी शुभंकर:।
आत्मेश: संस्कृताचार्यो निजेच्छु: स्वात्मभाषक:।।

उन्नत: प्राकृताचार्यो निजज्ञ: स्वात्मसुव्रत:।
आत्मार्य: स्वात्मविद्यार्थी सुकांत: स्वात्मरञ्जक:।।

आत्मप्रेमी विरागात्मा सुमित्र: स्वात्मपोषक:।
ज्ञानार्थी स्वात्मगुप्तार्थी सुप्रभास्वात्मभूषित:।।

निजस्थ: स्वात्मसत्यार्थी स्वात्मकान्तिविवर्धक:।
आत्मासीनो जिनाचार्य: स्वात्मलोकाग्रवासिन:।।

ॐ ह्रीं श्री आत्माध्यातादि शतनाम धारकाय श्री विमर्शगुरुवे नमो नम:।

(इति नवमं श्री आत्मध्यातादि शतकम्)

मनीषी सर्वतोभद्र: ज्ञानपुञ्ज चालौकिक:।
गुरुवर्यो गुणाकर्षी मुनीन्द्र: पाकशासन:।।

अनगार: चैवौजस्वी चालस्यसूरिरग्रज:।
नेहशीलो महाशयोऽप्रतिमश्च सुसज्जन:।।

प्रियदर्शी सुनिर्लिप्तो मंत्रमूर्तिश्च सूत्तम:।
मुदित: कुशलाचार्यो विनेता चैवाचंचल:।।

कृतज्ञो ज्योतिषाचार्यो दिव्यसन्त: शमोदय:।
ज्ञानांशु परमाकांक्षी शीलांश: सुदमोदय:।।

सुप्रतापी सुधर्मज्ञो वरो विघ्नविनाशन:।
स्वधर्माक्षराकांक्षी मे विमर्शो गुरुरुत्तम:।।

नम: सुधर्मरूपाय शान्तिनाथाय ने नम:।
जिनागम सुपंथाय विमर्श गुरवे नम:।।

गुरुभक्त्या: प्रसादेन प्रसादाय गुरो: कृपा।
स्वगुरुनामकंस्तोत्रं ''विचिन्त्य'' मुनिना कृतम्।।

ॐ ह्रीं श्री दिव्यमूर्त्यादि शतनाम धारकाय श्री विमर्शगुरुवे नमो नम:।

(इति दशमं दिव्यमूर्त्यादि शतकम्)